“अधिकास्तेचतुःषष्टिर्न्यूना द्वादश ताः कलाः ।
एताभ्यो नाधिकाः कार्य्या न्यूनाश्चापि न पण्डितैः” ॥

तत्र तावच्चण्डवृत्तकलिका द्विधा । नखो विशिख-श्चेति भेदात् । तत्र रत्नादि-विंशतिभेदस्य नखस्येह वर्ज्जितादयो नव भेदा गृहीताः ।

“वर्ज्जितं वीरभद्रश्च समग्रोऽच्युत उत्पलम् ।
तुरङ्गः श्रीगुणरतिस्तथा मातङ्गखेलितम् ।
तिलकश्चेति कलिका नखस्येहोदिता नव” ॥ इत्युक्तेः ॥

अथ विशिखः । पद्मकुन्दचम्पकवञ्जुलभेदात् पञ्च-विधः । तेष्वादिमं पद्मं पङ्केरुहसितकञ्जपाण्डूत्पले-न्दीवराङ्गाम्भोरुहकह्लारभेदात् षड्विधम् । अन्तिमं वकुलन्तु भासुरमङ्गलभेदात् द्विविधमित्ये-कादशभेदो विशिखः ।

“पङ्केरुहं सितकञ्जं तथा पाण्डूत्पलं परम् ।
इन्दीवराङ्गाम्भोजे कह्लारश्चेति षड्विधम् ॥
ईषद्भेदेन कथितं पद्ममेव मनीषिभिः ।
चम्पकं वञ्जुलं कुन्दं वकुलं द्विविधं तथा” ॥

इति पञ्चविधस्यापि विशिखस्यैकादशधा इत्युक्तेः । एवं चण्डवृत्तकलिका विंशतिधा गृहीताः ॥ * ॥

अथ पञ्चधा द्विगादिगजवृत्तकाकलिका मञ्जरी-त्यभिहिता क्रमात् कोरकगुच्छकसंफुल्लकुसुम-गन्धाख्या । तस्याश्चात्र कोरकगुच्छकुसुमानि गृहीतानि । कोरको गुच्छकुसुमैर्मञ्जरी त्रिविधात्र त्वित्युक्तेः । त्रिभङ्गी कलिका तु शिखरिण्यादि-पूर्व्वा षोढ़ा । तस्याश्चात्र दण्डकपूर्व्वा विदग्धपूर्व्वा च गृहीता । दण्डकाख्या विदग्धाख्या त्रिभङ्गीह द्विधा मतेत्युक्तेः ॥ * ॥ अथ मिश्रकलिका तु कलिकागद्यसंपृक्ता सप्तविभक्तिका वा । अच्युत-मयी सर्व्वलघ्वी चेति द्विभेदा केवला चेत्यष्टौ । तदेवं षड्भ्यो महाकलिकाभ्योऽष्टाविंशतिरिह कलिका गृहीताः । रत्नादय एकादश नखभेदाः । संफुल्लगन्धौ मञ्जरीभेदौ । शिखरिण्यादयः त्रिभ-ङ्गीभेदा मध्यकलिका च त्यक्ताश्चातताधिक्यविर-हात् । इति रूपगोस्वामिकृतगोविन्दविरुदावली-भाष्ये बलदेवविद्याभूषणः ॥ (छन्दोभेदः । यदुक्तं वृत्तरत्नाकरे ४ अध्याये ।

“प्रथममपरचरणसमुत्थं
श्रयति स यदि चान्य ।
इतरदितरगदितमपि यदि च तूर्य्यम्
चरणयुगलकमविकृतमपरमिति कलिका सा” ॥

कला । यथोक्तं सिद्धान्तशिरोमणौ ।

“तन्यन्ते कलिका यस्मात्तस्मात्तास्तिथयः स्मृताः” ॥)

कलिकापूर्व्वं, क्ली, (कलिकया अंशेन जन्यं अपूर्व्वं अदृष्टम् ।) अङ्गप्रधानान्यतरयज्ञकर्म्मसाध्यस्वर्गा-दिफलजनकापूर्व्वोत्पत्तौ तत्तत्प्रत्येककर्म्मजन्यमदृ-ष्टम् । इति स्मृतिः ।

कलिकारः, पुं, (कलिं चिचिकुचीतिशब्देन कलहं करोतीति । कलि+कृ+अण् ।) धूम्याटपक्षी । पीतमस्तकपक्षी । (कलिं स्वदेहस्थकण्टकैरनिष्टं करोतीति ।) पूतिकरञ्जः । इति मेदिनी ॥

कलिकारकः, पुं, (कलिं कण्टकैरनिष्टं करोति । कलि+कृ+णिच्+ण्वुल् ।) पूतिकरञ्जः । काँटा-करञ्ज नाटाकरञ्ज इति च भाषा । इत्यमरः । २ । ४ । ४८ ॥ (कलिं कलहं कारयति । कलि+कृ+णिच्+ण्वुल् ।) नारदमुनिः । इति हेमचन्द्रः ॥

कलिकारी, स्त्री, (कलिं गर्भपाताद्यनिष्टं करोतीति । कलि+कृ+अण् । जातित्वात् ङीष् ।) उप-विषभेदः । विषलाङ्गलीया इति भाषा । तत्प-र्य्यायः । लाङ्गली २ हलिनी ३ गर्भपातनी ४ दीप्ता ५ विशल्या ६ अग्निमुखी ७ हली ८ नक्ता ९ इन्द्रपुष्पिका १० विद्युज्ज्वाला ११ अग्निजिह्वा १२ व्रणहृत् १३ पुष्पसौरभा १४ स्वर्णपुष्पा १५ वह्निशिखा १६ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । कफवातनाशित्वम् । गर्भान्तःशल्यनि-ष्कामकारित्वम् । परमसारित्वञ्च । इति राज-निर्घण्टः ॥

कलिङ्गं, क्ली, (कलि+गम्+ड । निपातनात् साधुः ।) इन्द्रयवम् ॥ इत्यमरः । २ । ४ । ६७ ॥

कलिङ्गः, पुं, (कलिं पूतिगन्धादिकं गच्छति प्राप्नोति कलि+गम्+ड । निपातनात् साधुः ।) पूतिक-रञ्जवृक्षः । (के मस्तके लिङ्गं पीतादिचिह्नमस्य ।) धूम्याटपक्षी । देशविशेषः । इति हेमचन्द्रः ॥ (स्वनामख्यातो नृपतिविशेषः । अस्य नामानुसारे-णैव कलिङ्ग इति देशाख्या जाता । यदुक्तं महा-भारते । १ । १०४ । ४९,५० ।

“अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ।
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ॥
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः ।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः” ॥)

मेदिनीमते अयमर्थे पुं भूम्नि । (यदुक्तं तत्रैव गणिके ३३ ।

“कलिङ्गः पूतिकरजे धूम्याटे भूम्नि नीवृति” ।

अस्य प्रमाणं यथा, गौः रामायणे । ४ । ४० । २१ ।

“ततः शकपुलिन्दांश्च कलिङ्गांश्चैव मार्गतः” ॥

तद्देशवासिमानवादयः । यथा, महाभारते । ३ । ११४ । ३ ।

“ततः समुद्रतीरेण जगाम वसुधाधिपः ।
भ्रातृभिः सहितो वीरः कलिङ्गान् प्रति भारत” ॥)

कुटजवृक्षः । (अस्य पर्य्यायो यथा भावप्रकाशे पूर्व्वखण्डे १ भागे ।

“उक्तं कुटजबीजन्तु यवमिन्द्रयवन्तथा ।
कलिङ्गञ्चापि कालिङ्गं तथा भद्रयवा अपि” ॥

इन्द्रयवशब्देऽस्य गुणावली ज्ञेया ॥

व्यवहारो यत्र तद्यथा ।

“बिल्वं छागपयः सिद्धं सितामोचरसान्वितम् ।
कलिङ्गचूर्णसंयुक्तं रक्तातीसारनाशनम्” ॥

इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे ॥) शिरीषवृक्षः । प्लक्षवृक्षः । इति राजनिर्घण्टः ॥

कलिङ्गकः, पुं, (कलिङ्ग+संज्ञायां कन् । कलिङ्ग इव कायति वा । कै+कः ।) इन्द्रयवम् । इति रत्नमाला ॥ (यथा, वैद्यकचक्रपाणिसंग्रहे ज्वरा-धिकारे ।

“कलिङ्गकाः पटोलस्य पाठा कटुकरोहिणी” ॥)

कलिङ्गा, स्त्री, (कं सुखं लिङ्गतीति । क+लिङ्ग+अच् टाप् ।) नितम्बिनी । महिला । इति मेदिनी करहेमचन्द्रौ ॥ त्रिवृत् । इति शब्दचन्द्रिका । तेउड़ि इति भाषा ॥

कलिञ्जः, पुं, (कं वातं लञ्जति तिरस्करोति रोधने-नेति यावत् । क+लजि भर्त्सने+“कर्म्मण्यण्” ३ । २ । १ । इति अण् । निपातनात् साधुः ।) कटः । इति हेमचन्द्रः ॥ चाँच् दरमा इत्यादि भाषा ॥

कलितं, त्रि, (कल्+कर्म्मणि क्त ।) विदितम् । आप्तम् । इति मेदिनी ॥ मेदितम् । गणितम् । इति शब्दरत्नावली ॥ धृतम् यथा,—

“करकलितकपालः कुण्डली दण्डपाणिः” । इति भैरवध्यानम् ॥

(प्राप्तः । यथा आर्य्यासप्तशती ३५५ ।

“विशिख इव कलितकर्णः प्रविशति हृदयं न निःसरति” ॥ भावे+क्त । ज्ञानम् ॥)

कलिद्रुमः, पुं, (कलिना आश्रितो द्रुमः शाकपार्थि-वादिवत् मध्यपदलोपः ।) विभीतकवृक्षः । इत्य-मरः । २ । ४ । ५८ । बयड़ा इति भाषा ॥ (अस्य पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे । १ भागे ।

“विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलश्च सः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः” ॥

विशेषविवरणमस्य विभीतकशब्दे ज्ञेयम् ।)

कलिन्दः, पुं, (कलिं ददाति द्यति वा खच् मुम् च ।) विभीतकवृक्षः । इति राजनिर्घण्टः ॥ (विभीतक-शब्देऽस्य विशेषो ज्ञातव्यः ॥) सूर्य्यः । पर्व्वत-विशेषः । यस्मात् यमुना निर्गता । इति कालि-न्दीशब्दव्युत्पत्तौ भरतः ॥ (यथा रघुः ६ । ४८ ।

“कलिन्दकन्या मथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति” ॥)

कलिन्दकन्या, स्त्री, (कलिन्दस्य पर्व्वतविशेषस्य कन्या तदुत्पन्नत्वात् ।) यमुनानदी । इति राजनिर्घण्टः ॥

(“कलिन्दकन्यामथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति” ॥

इति रघुः । ६ । ४८ ॥)

कलिन्दनन्दिनी, स्त्री, (कलिन्दं नन्दयति । कलिन्द+नन्द+णिनिः ङीप् च । कलिन्दस्य नन्दिनी वा ।) यमुनानदी । इति शब्दरत्नावली ॥

कलिप्रियः, पुं, (कलिः कलहः प्रियो यस्य ।) नारद-मुनिः । यथा । “कलिप्रियस्य प्रियशिष्यवर्गः” । इति रघुः ॥ (कलेः प्रियः । दुष्टप्रकृतिकः ।) वा-नरः । इति शब्दरत्नावली ॥

कलिमारकः, पुं, (कलीनां कलिकानां माला यत्र । तस्य रः आप् संज्ञायां कन् वा । यद्वा कलिना स्वदेहस्थकण्टकाघातदुःखेन मारयतीति । कलि+मृ+णिच्+ण्वुल् ।) कलिकारकः । इत्यमर-टीकायां रमानाथः । २ । ४ । ४८ ॥

कलिमालकः, पुं, (कलीनां माला यत्र । आप् कलिमा मारयति वा रस्य लः ।) कलिकारकः । इति स्वामी इत्यमरटीकायां भरतः ॥

कलिमाल्यः, पुं, (कलीनां माल्यं यत्र ।) पूतिकरञ्जः । इति राजनिर्घण्टः ॥